# श्रीमद्देवीभागवतगतशान्तरसानुशीलनम्

भरतभट्टराईः
उपप्राध्यापकः
रुरुसंस्कृतविद्यापीठम्, रिडी,गुल्मी।
bharat96152@gmail.com

## शोधसारः

अस्मिन्नालेखे श्रीमद्देवीभागवतमहापुराणस्य परिचयः, देवीभागवतस्य स्वरूपम्, शान्तरसस्य परिचयः, देवीभागवतगतशान्तरसस्थितिश्च निरूपितास्ति। प्रथमन्तावद् द्वादशस्कन्धेषु विभक्तस्य देवीभागवतस्य प्रथमस्कन्धस्य शान्तरसानुशीलनं विहितमस्ति । प्रथमस्कन्धे प्रथमाध्यायस्य सूतशौनकसंवादप्रसङ्गे शान्तरसस्थितिर्विद्यते । एवञ्च द्वितीयस्कन्धे द्वितीयाध्यायस्य सत्यवतीव्यासप्रसङ्गे, तृतीयस्कन्धे तृतीयाध्यायस्य व्यासजनमेजयप्रसङ्गे, चतुर्थस्कन्धेऽष्टमाध्यायस्य च्यवनप्रह्लादप्रसङ्गे, पञ्चमस्कन्धे सुरथराजवर्णने, षष्ठस्कन्धे ब्रह्मकृतमायावर्णनसन्दर्भे, सप्तमस्कन्धे च्यवनर्षिवर्णनसन्दर्भे, अष्टमस्कन्धे नारदकृतनारायणस्तवने, नवमस्कन्धे तुलसीतपश्चर्यावर्णने, दशमस्कन्धे नारदकृतनारायणप्रार्थनायाम्, एकादशस्कन्धे बृहद्रथप्रसङ्गे, द्वादशस्कन्धे गौतमर्षिकृतब्राह्मणसत्कारे शान्तरसस्थितिः प्रस्तुता । अत्र वर्णितानां सूतशौनकव्यासनारदजनमेजयसुरथराजसमाधिवैश्यादिपात्राणां देवीविषयिणी रतिः शान्तरसं प्रति गच्छन्ती दृश्यत इति निष्कर्षः।

**शब्दकुञ्जी :** अनुभावः, आलम्बनविभावः, उद्दीपनविभावः, शान्तरसः, सञ्चारिभावः, स्थायिभावः।

## विषयप्रवेशः

श्रीमद्देवीभागवतमहापुराणं महापुराणेषु सुप्रसिद्धं पुराणमस्ति। अस्मिन् देवीभागवते द्वादशस्कन्धाः सन्ति । तेषु स्कन्धेषु विशेषतो देव्याश्चरित्रम्, देवीभक्तानां चरित्रम्, देवीभक्तपीडकानां दुष्टदैत्यानां नृपाणाञ्च चरित्रं ग्रथितं दृश्यते। इदन्तु पुराणमस्ति, अत्र तु देव्यादीनां पुरातनी कथा वर्णिता वर्तते, अयमैतिहासिको ग्रन्थः, अतः कथमत्र साहित्यस्य सारतत्त्वरूपस्य रसस्य प्रवेश ? इति नोच्यताम्। भवतु पुराणमैतिहासिकग्रन्थो वा परन्तु साहित्यस्य न्यूनाधिकतया प्रवेशो वेदोपनिषत्पुराणादिष्वपि दृश्यते। यथा श्रीमद्भागवते रसालङ्कारध्वन्यादीनां स्थले स्थले मधुरानुभूतिर्भवति तथैव देवीभागवतेऽपि सानुभूयते। साहित्यसिद्धान्तदृशापि परिशीलनीयस्यास्य ग्रन्थस्य नवरसेषु मूर्ध्नि स्थितं शान्तरसमादाय लघ्वसन्धानरूप आलेखो लिख्यते।

## समस्याकथनमुद्देश्यञ्च

अत्र हि श्रीमद्देवीभागवतं किमस्ति ? अत्र हि किं वर्णितमस्ति ? अत्र रसोऽस्ति न वा ? अस्ति चेच्छान्तरसस्य स्थितिः कीदृशी वर्तते ? इत्यादयः प्रश्नाः समस्या वा समुद्यन्ति। तन्निराकरणाय यत्नोऽनेनालेखमाध्यमेन क्रियमाणो वर्तते।

## शोधविधिः

प्राच्यानुसन्धानसरण्यां प्रसिद्धाया मधुकरपद्धत्या विशेषतया स्वोपज्ञतापद्धत्याश्च शोधकार्यसम्पादनाय यथास्थानं प्रयोगः कृतोऽस्ति । सामग्रीसङ्कलनाय विशेषतया पुस्तकालयविधिः स्वीकृतः, कुत्रचित्तु तद्विषयकविज्ञजनसम्पर्काय क्षेत्रभ्रमणविधिश्चाङ्गीकृतः । तथ्यविश्लेषणे प्रतिवेदननिर्माणे च यथावश्यकमागमननिगमनकार्यकारणभावव्याख्यादिविधयः स्वीकृताः । पादटिप्पणीक्रमे प्राचीनानां

ग्रन्थानामुद्धरणक्रमे ग्रन्थप्रकरणश्लोकसंख्यादिसूचकः परम्परागतो विधिः, सामान्यायां स्थितौ लेखकपृष्ठ(एपीए) विधिः अनुसृतः।

## पूर्वाध्ययनम्

श्रीमद्देवीभागवतपुराणमतिलोकप्रसिद्धपुराणत्वादस्य विषयेऽपि विविधा आलेखा अनुवादात्मकग्रन्थाश्च प्राप्यन्ते। संस्कृतनिबन्धनवनीतम्, संस्कृतसाहित्येतिहासः इति पुस्तके तु यथा भागवतस्य चर्चा प्राप्यते न तथा देवीभागवतस्य। गीताप्रेस इत्याख्येन संस्थानेन प्रकाशितस्य देवीभागवतस्य भूमिकायाम्—

लोके सर्वजीवानां कृते मातृभावस्य महन्महिमा वर्तते। जनः स्वसर्वाधिकश्रद्धां स्वभावतः मातृचरणयोरेव समर्पयति यतो हि खलु मातुरङ्के स सर्वप्रथमं लोकदर्शनसौभाग्यं लभते। अतो माता एव सर्वेषां प्राणिनामादिगुरुरूपेण प्रतिष्ठिता। तस्याः कारुण्यमनुग्रहश्च बालकानां ऐहिकपारलौकिककल्याणस्य आधारोऽस्ति। ........ (श्रीमद्देवीभागवतभूमिकायाम्, पृ.३) इत्यादिकं वर्णितमस्ति; न कुत्रापि शान्तरसगन्धः प्राप्यते। शोधगङ्गा इत्याख्ये यान्त्रिकपुस्तकालयेऽन्वेषितेऽपि न तत्राप्यस्य रसस्य स्थितिर्दृश्यते। अतोऽनुद्घाटिततथ्यस्योद्घाटन एव प्रयत्नोऽयं विहितोऽस्ति।

## शोधक्षेत्रं सीमाङ्कनञ्च

अस्य शोधकर्मणः स्थानदृशा पुस्तकालया देवीभागवतमर्मज्ञनिवासस्थलानि च क्षेत्राणि विद्यन्ते। विषयदृशा देवीभागवतं पौरस्त्यं पाश्चात्त्यञ्च साहित्यशास्त्रं साहित्यं च प्रधानं क्षेत्रं धर्मशास्त्रादिकमन्यपुराणादिकञ्चानुषङ्गिकं विषयक्षेत्रमस्ति। सीमाङ्कनन्तु देवीभागवतगतशान्तरसस्यैवानुशीलनं वर्तते।

## सैद्धान्तिकपर्याधारः

अस्मिन्नध्ययने नाट्यशास्त्रकाव्यालङ्कारध्वन्यालोककाव्यप्रकाशसाहित्यदर्पणादिग्रन्थेभ्यः, तद्विवरणभूतग्रन्थेभ्यः, प्राच्यसाहित्यावबोधककतिपयाधुनिकग्रन्थेभ्यश्च सामग्रीसङ्कलनं विहितमस्तीति एत एव कथञ्चिद् सैद्धान्तिकाधारत्वेन अङ्गीकृता इति वक्तुं शक्यते।

## शोधकार्यस्यौचित्यम्

महर्षिवेदव्यासविरचितस्य श्रीमद्देवीभागवतमहापुराणस्य अस्माकमार्यसंस्कृतौ महत्त्वपूर्णं स्थानमस्ति। नारायणतः प्रवहमाना ज्ञानगङ्गा अस्मिन् कलियुगे श्रीमद्देवीभागवतादिरूपेण भुवि अवतीर्णास्ति। जनमेजयस्य सद्बुद्धिदात्री परीक्षितस्य मुक्तिदात्री श्रीमद्देवीभागवतज्ञानगङ्गा अधुनापि जिज्ञासुजनमनांसि पावयन्त्यस्ति। श्रीमद्देवीभागवतसम्बन्धिनो विविधा लेखाः स्वदेशेषु विदेशेषु विविधासु भाषासु प्रकाशिताः प्रकाश्यमानाश्च सन्ति। अतः सर्वप्रियस्य श्रीमद्देवीभागवतस्य भक्तिदर्शन–आध्यात्मिकदर्शन–सामाजिकदर्शन–रसालङ्कारादिविविधपक्षेषु गहनतयाध्ययनस्य परमावश्यकतास्ति। नेपालदेशेऽन्यशास्त्रापेक्षया श्रीमद्देवीभागवतस्य, श्रीमद्भगवद्गीतायाः, श्रीमद्भागवतस्य च जनानुरागः प्रतिदिनं समेधमानोऽस्ति। प्रायशोऽनुवादसम्बन्धिनां ग्रन्थानां बाहुल्यात् श्रीमद्भागवतस्य समीक्षात्मकग्रन्थानां स्वल्पत्वाच्छान्तरसानुशीलनमत्र करिष्यते। अर्थानुसन्धाने रसज्ञानमपि सहैव भवति चेत्तदा अर्थावबोधाय अर्थविस्तृतये च सौकर्यं भविष्यति। प्रायशः पौराणिकप्रवचनप्रसङ्गे श्लोकानुवादविधिः अवलम्ब्यमानो दृश्यते। अस्मिन् श्लोके अनेन कारणेन शान्तरसोऽस्तीति विश्लेषणपूर्वकं पठनपाठनादीनां परमावश्यकतास्ति। अतोऽयं शोधः श्रीमद्देवीभागवतस्य अर्थानुसन्धाने प्रवृत्तानां समेषां जनानामुपयोगी भविष्यतीति सिद्धत्यस्य

शोधकार्यस्यौचित्यम् ।

## शान्तरसपरिचयः

उपशमार्थकाद् ण्यन्तात् शम्धातोः क्तप्रत्ययेन (अष्टाध्यायी ३।२।१०२) निष्पन्नः शान्तशब्दः संस्कृतवाङ्मयेऽतिमुक्तार्थे रसविशेषे शमयुक्ते धारणार्थे च (मेदिनीकोशः ५८।६२–६४) प्रयुक्तोऽस्ति । शमितशब्दस्य शान्तपर्यायत्वेन प्रयोगोऽपि लभ्यते (अमरकोशः ३।१।९७) । भरतमतानुसारेण मोक्षप्रवर्तकस्य शमस्थायिभावस्य शान्तरसस्य तत्त्वज्ञानवैराग्यातिशयशुद्धिप्रभृतिभिर्विभावैर्यमनियमाध्यात्मध्यानधारणोपासनादयासन्यासप्रभृतिभिरनु-भावैर्निर्वेदस्मृत्यादिभिर्व्यभिचारिभावैः स्तम्भरोमाञ्चप्रभृतिभिः सात्त्विकभावैरभिव्यक्तिर्भवति (ना.शा.प्र.भा. पृ.३५०–३५३) । शारदातनयस्य मते लौकिकवस्तूनां हेयत्वस्य धर्माख्यानरूपाणां पुराणानाञ्च ज्ञानं पुण्यतीर्थस्नानं पुण्याश्रमवासो योगिभिः सह सङ्गतिरङ्गहीनानां तारतम्यस्य दर्शनं व्याधेर्दारिद्र्यस्य च कारणाद् भेददर्शनं नरकगतानां यातनानां श्रवणं धर्मफलस्याप्यनित्यतानिश्चयजन्मनः पर्यालोचनं क्लेशः प्रयासवैफल्यमाधिभौतिकाधि-दैविकाध्यात्मिकताप पीडेत्यादिभिर्विभावैरुत्पन्नः शमरूपस्थायिभावः शान्तरसरूपं प्रतिपद्यते (भा.प्र. पृ.१९१–१९२) ।

विश्वनाथेनापि शान्तस्य शमस्थायी लक्ष्मीनारायणोऽधिष्ठाता शुक्लो वर्ण उत्तमप्रकृतिको जन आश्रयालम्बनमनित्यतया दुःखशीलतया च संसारासाराकलनं परब्रह्मस्वरूपञ्च विषयालम्बनानि ऋषीणामाश्रमास्तीर्थान्येकान्तवनानि महात्मनां सङ्गतयश्चोद्दीपनानि रोमाञ्चादयोऽनुभावा निर्वेदहर्षस्मृतिमत्यादयश्च सञ्चारिभावा प्रतिपादिताः (सा.द. ३।२४५–२४९) ।

शान्तरसस्य प्राचीनत्वे सर्वमान्यत्वेऽपि तस्याश्रयविषये स्थायिभावविषये चाचार्येषु विवादोऽस्ति । तत्र केचन धनञ्जयप्रभृतयः शान्तरसस्य स्थितिमेव न स्वीकुर्वन्ति (द.रू. ४।४५) । धनिकस्तु केवलं नाट्यप्रबन्धेष्वेव शान्तरसस्य सत्तामस्वीकरोति न काव्यप्रबन्धे (तत्रैव अवलोकटीकायाम् ) । परन्तु नाट्यशास्त्रस्य प्रामाणिकटीकाकारोऽभिनवगुप्तपादः सर्वरसमूलत्वेनाङ्गीकुर्वाणः काव्यनाट्ययोः सर्वत्रैव शान्तरसस्य स्थितिमङ्गीकुरुते । परं स शान्तरसस्य शमं स्थायिभावं न मनुते । तदनुसारेण तत्त्वज्ञानजो निर्वेद एव शान्तरसस्य स्थायिभावो वर्तते (ना.शा.अभि.भा.प्र.भा. पृ.३३१–३३४) । मम्मटोऽप्यभिनवं समर्थयन् निर्वेदमेव शान्तस्य स्थायीति कथयति (का.प्र. ४।३५) । आनन्दवर्धनेनाभिनवेन च महाभारते शान्तरसस्याङ्गिता महता संरम्भेण साधिता च दृश्यते (ध्वन्या.४ पृ.५७०–५७८ लोचनटीकायाम् ) । इममेव रसमाधृत्य श्रीमद्देवीभागवतस्य रसत्वपरीक्षणं विधीयते ।

## श्रीमद्देवीभागवतगतशान्तरसानुशीलनम्

देवीभागवते नैकेषां रसानां स्थितिर्दृश्यते । तत्रापि देवीगतरतिभावपरिपुष्टस्य शान्तरसस्य सर्वातिशयोपस्थितिर्दृश्यते । अत्र स्कन्धानुसारमतिसङ्क्षिप्तया शान्तरसानुशीलनं विधीयते—

### प्रथमस्कन्धगतशान्तरसानुशीलनम्

भूमिकारूपे प्रथमस्कन्धे श्रीमद्देवीभागवतकथाश्रवणोत्सुकानां शौनकादिमुनीनां सुतेन सह संवादः, तत्प्रसङ्गे व्यासनारदसंवादः तथा हयग्रीवमधुकैटभवधशुकजनकानाञ्च चर्चा सम्प्राप्यते ।

तत्रापि प्रथमाध्यायस्य सूतशौनकसंवादान्तर्गतनिम्नश्लोकैः शान्तरसः स्पष्टतया यथानुभूयते –

सूत सूत महाभाग धन्योऽसि पुरुषर्षभ ।

यदधीतास्त्वया सम्यक् पुराणसंहिताः शुभाः ॥
श्रोत्रेन्द्रिययुताः सूत नराः स्वादविचक्षणाः ।
न श्रृण्वन्ति पुराणानि वञ्चिता विधिना हि ते ॥
अतः सर्वे द्विजाः सौम्य श्रोतुकामाः समाहिताः ।
वर्तन्ते नैमिषारण्ये क्षेत्रे कलिभयार्दिताः ॥
येन केनाप्युपायेन कालातिवाहनं स्मृतम् ।
व्यसनैरिह मूर्खाणां बुधानां शास्त्रचिन्तनैः ॥ (श्रीमद्देवीभा.१।१।१,८,११,१२)

अत्र हि सूतशौनकादीनामध्यात्मचर्चाविषयकात् प्रसङ्गात् समुद्धृतेषु श्लोकेषु संसारासाराकलनरूपं विषयालम्बनं शौनकादिमुनय आश्रयालम्बनमृषीणामाश्रमास्तीर्थान्येकान्तवनानि महात्मनां सङ्गतयश्चोद्दीपनानि अध्यात्मचर्चाध्यानधारणादयोऽनुभावा निर्वेदहर्षस्मृत्यादयश्च सञ्चारिभावाः स्तम्भरोमाञ्चप्रभृतयः सात्त्विकभावाः शमस्थायिकं शान्तरसं परिपुष्टतां नयन्ति ।

एवञ्च तृतीयाध्यायस्य देवी सर्वोत्तमा इति प्रतिपादनावसरे सूतस्य निम्नकथनेऽपि शान्तरसस्थितिर्यथा दृश्यते–

या निर्गुणा हरिहरादिभिरप्यलभ्या
विद्या सतां प्रियतमाथ समाधिगम्या ।
सा तस्य चित्तकुहरे प्रकरोति भावं
यः संश्रृणोति सततं तु सतीपुराणम् ॥
सम्प्राप्य मानुषभवं सकलाङ्गयुक्तं
पोतं भवार्णवजलोत्तरणाय कामम् ।
सम्प्राप्य वाचकमहो न श्रृणोति मूढः
स वञ्चितोऽत्र विधिना सुखदं पुराणम् ॥ (१।३।४१,४२)

अत्र हि समाधिगम्या विद्या सतीपुराणञ्च विषयालम्बनं सतीपुराणवक्ता सूत आश्रयालम्बनं नैमिषारण्य-क्षेत्रतपस्विजनसम्पर्कादय उद्दीपनानि यमनियमध्यानधारणादिपूर्वकं सतीपुराणमहत्त्वख्यापनमनुभावो निर्वेद-हर्षस्मृतिमत्यादयश्च सञ्चारिभावाः शमस्थायिकं शान्तरसं परिपुष्टतां नयन्ति । तथैव पञ्चदशाध्यायस्य व्यासशुकसंवादप्रसङ्गे गृहात् प्रव्रजितुं समभिलाषुकस्य शुकस्य वैराग्यपूर्णनिम्नकथनेऽपि शान्तरसस्थितिर्यथा दृश्यते—

नाहं गृहं करिष्यामि दुःखदं सर्वदा पितः ।
वागुरासदृशं नित्यं बन्धनं सर्वदेहिनाम् ॥
धनचिन्तातुराणां हि क्व सुखं तात दृश्यते ।
स्वजनैः खलु पीड्यन्ते निर्धना लोलुपा जनाः ॥
इन्द्रोऽपि न सुखी तादृग्यादृशो भिक्षुनिःस्पृहः ।
कोऽन्यः स्यादिह संसारे त्रिलोकीविभवे सति ॥
जन्मदुःखं जरादुःखं दुःखं च मरणे तथा ।

गर्भवासे पुनर्दुःखं विष्ठामूत्रमये पितः ॥
योगशास्त्रं वद मम ज्ञानशास्त्रं सुखाकरम् ।
कर्मकाण्डेऽखिले तात न रमेऽहं कदाचन ॥ (१।१५।१,२,३,१०,१६)

अत्र हि वैराग्यजनकानि सच्छास्त्राणि विषयालम्बनानि, वागुरासदृशगृहाद् भीतः शुक आलम्बनविभावः, तपोवनतपस्विजनसम्पर्कादीनि उद्दीपनानि, वैराग्यजनकतथाविधव्यवहारोऽनुभावः, निर्वेदस्मृतिमत्यादयश्च सञ्चारिभावाः शमस्थायिकं शान्तरसं परिपुष्टतां नयन्ति ।
एवं प्रकारेण अष्टादशाध्यायस्य शुकजनकसंवादेऽपि शान्तरसस्थितिर्यथा दृश्यते–

सम्प्राप्तोऽहं महाराज त्वत्पुरे च तदाज्ञया ।
मोक्षकामोऽस्मि राजेन्द्र ब्रूहि कृत्यं ममानघ ॥
तपस्तीर्थव्रतेज्याश्च स्वाध्यायस्तीर्थसेवनम् ।
ज्ञानं वा वद राजेन्द्र मोक्षं प्रति च कारणम् ॥ (१।१८।१३,१४)

जनक उवाच

अष्टौ च मुक्तिकामस्य प्रोक्ताः शमदमादयः ।
आश्रमादाश्रमं गच्छेदिति शिष्टानुशानम् ॥
इन्द्रियाणि बलिष्ठानि न नियुक्तानि मानद ।
अपक्वस्य प्रकुर्वन्ति विकारांस्ताननेकशः ॥
भोजनेच्छां सुखेच्छां च शय्येच्छामात्मजस्य च ।
यती भूत्वा कथं कुर्याद्विकारे समुपस्थिते ॥ (१।१८।२२,२४,२५)

अत्रापि राजर्षिर्जनकस्तथा विविधविषयकाध्यात्मचर्चा विषयालम्बनं शुक आश्रयालम्बनं राजभवनेऽपि जनकस्य योगिवद्व्यवहरणं सम्भाषणञ्चोद्दीपनमध्यात्मतत्त्वोपदेशाय भूयो भूयो जनकप्रार्थनमनुभावो निर्वेदस्मृत्यादयश्च व्यभिचारिणो यतोऽभिव्यक्तः शमः शान्तरसतां प्रतिपद्यते ।

**द्वितीयस्कन्धगतशान्तरसानुशीलनम्**

अस्मिन् स्कन्धे मत्स्यगन्धोपत्त्युपाख्यानम्, व्यासोत्पत्तिः, शन्तनोर्जन्मोपाख्यानम्, भीष्मोत्पत्तिः तथा युधिष्ठिरादिपाण्डवकृष्णबलरामरुरुप्रमद्वारापरीक्षितजनमेजयकद्रूविनतानामुपाख्यानमुपलभ्यते ।
तत्रापि मातुः सत्यवत्या गर्भतो यमुनाद्वीपे जातमात्रस्य तेजस्विनो व्यासस्य निम्नकथने शान्तरसस्थितिर्यथा दृश्यते—

सुषुवे यमुनाद्वीपे पुत्रं काममिवापरम् ।
जातमात्रस्तु तेजस्वी तामुवाच स्वमातरम् ॥
तपस्येव मनः कृत्वा विविशे चातिवीर्यवान् ।
गच्छ मातर्यथाकामं गच्छाम्यहमतः परम् ॥
तपः कर्तुं महाभागे दर्शयिष्यामि वै स्मृतः ।
मातर्यदा भवेत्कार्यं तव किञ्चिदनुत्तमम् ॥
स्मर्तव्योऽहं तदा शीघ्रमागमिष्यामि भामिनि ।

स्वस्ति तेऽस्तु गमिष्यामि त्यक्त्वा चिन्तां सुखं वस ॥ (२।३।३७,३८,३९,४०)

अत्रहिपावनंयमुनातटंविषयालम्बनंवैराग्यसमुपेतोबालोव्यास आश्रयालम्बनंपावनजलप्रवाहनिर्जनदेशादिकमुद्दीपनं तथाविधव्यासकथनमनुभावः स्मृतिमतिनिर्वेदादयश्च सञ्चारिण एतैरभिव्यक्तः शमः शान्तरसतां प्राप्नोति। तथा चाष्टमाध्यायस्य पाण्डवानां महाप्रयाणप्रसङ्गेऽपि शान्तरसस्थितिर्दृश्यते, तत्तु विस्तारभयान्नेह प्रतन्यते।

**तृतीयस्कन्धगतशान्तरसानुशीलनम्**

अस्मिन् तृतीयस्कन्धे व्यासजनमेजयसंवादप्रसङ्गे भुवनेश्वरीमाहात्म्यम्, हरादीनां भगवतीदर्शनम्, तत्त्वनिरूपणम्, बीजमन्त्रनिरूपणम्, सत्यव्रतध्रुवसन्धियुधाजिद्वीरसेनानां तथा सुदर्शनभरद्वाजशशिकलासुबाहुसुशील-वैश्यादीनाञ्च कथानकं सम्प्राप्यते।

तत्रापि निम्नस्थले शान्तरसस्थितिर्यथा दृश्यते–

भगवन् भवता प्रोक्तं यज्ञमम्बाभिधं महत्।
सा का कथं समुत्पन्ना कुत्र कस्माच्च किं गुणा ॥
कीदृशश्च मखस्तस्याः स्वरूपं कीदृशं तथा।
विधानं विधिवद् ब्रूहि सर्वज्ञोऽसि दयानिधे ॥
को धर्मः कीदृशोऽधर्मश्चिह्नं नैवोपलभ्यते।
देवाः सत्त्वगुणोत्पन्नाः सत्यधर्मव्यवस्थिताः ॥
पीड्यन्ते दानवैः पापैः कुत्र धर्मव्यवस्थितिः ।
धर्मस्थिताः सदाचाराः पाण्डवा मम वंशजाः ॥
दुःखं बहुविधं प्राप्तास्तत्र धर्मस्य का स्थितिः ।
अतो मे हृदयं तात वेपतेऽतीव संशये ॥
कुरु मेऽसंशयं चेतः समर्थोऽसि महामुने।
त्राहि संसारवार्धेस्त्वं ज्ञानपोतेन मां मुने ॥ (३।१।१,२,४६,४६–४९)

अत्र व्यासजनमेजयसंवादप्रसङ्गे देवीभक्तिविलीनो शान्तो जनमेजयः अम्बामखस्वरूपादिनिरूपणाय व्यासमनुरुणद्धि, व्यासोऽपि सम्यक् तन्निरूपयति। अतोऽत्र व्याससङ्गतिः विषयालम्बनं जनमेजय आश्रयालम्बनं युक्तियुक्तं व्यासकथनमुद्दीपनं पुनः पुनः व्यासप्रार्थनमनुभावः स्मृतिमत्यादयो व्यभिचारिणो यतोऽभिव्यक्तः शमः शान्तरसरूपेण सामाजिकानामास्वादपदवीमधिरोहति।

एवञ्च द्वितीयाध्यायस्य व्यासनारदसंवादे सप्तमाध्यायस्य ब्रह्मनारदसंवादेऽपि रसास्यास्य स्थितिरनुभूयते।

**चतुर्थस्कन्धगतशान्तरसानुशीलनम्**

चतुर्थस्कन्धे विशषतो जनमेजयस्य प्रश्नानुसारं महामुनिः व्यासः कर्मणो जन्मादिकारणत्वम्, आदित्यै दित्याः शापदानम्, मायाप्राबल्यम्, नरनारायणप्रह्लादशुक्राचार्यदेवेन्द्रादीनाञ्च वर्णनं करोति । तत्प्रसङ्गे विविधस्थलेषु शान्तरसस्थितिर्दृश्यते।

तथैव अष्टमाध्यायस्य च्यवनप्रह्लादसंवादप्रसङ्गे प्रह्लादप्रश्नानुसारं च्यवनो जीवनस्य सारतत्त्वं यथा वर्णयति—

कारणं मन एवात्र नान्यद्राजन्विचिन्तय।

मनःशुद्धिः प्रकर्तव्या सततं शुद्धिमिच्छता ॥
तीर्थवासी महापापी भवेत्तत्रात्मवञ्चनात् ।
तत्रैवाचरितं पापमानन्त्याय प्रकल्पते ॥
यथेन्द्रवारुणं पक्वं मिष्टं नैवोपजायते ।
भावदुष्टस्तथा तीर्थे कोटिस्नातो न शुद्ध्यति ॥ (४।८।३४–३६)

जीवनस्य सारतत्त्ववर्णनपरेषूपर्युक्तेषु पद्येषु भगवद्भक्तप्रह्लादसङ्गतिः विषयालम्बनं महामुनिः च्यवन आश्रयालम्बनं प्रह्लादस्य तथाविधप्रार्थनादिकमुद्दीपनं जीवनसारतत्त्ववर्णनमनुभावः स्मृतिमत्यादयः सञ्चारिभावा एतैरभिव्यक्तः शमः शान्तरसरूपतां प्रतिपद्यते ।

**पञ्चमस्कन्धगतशान्तरसानुशीलनम्**

पञ्चमस्कन्धे योगमायाप्रभाववर्णनादारभ्य महिषासुरोत्पत्तिः तस्य तपश्चर्या महिषासुरादिभिः शुम्भनिशुम्भादिभिश्च सह देवीयुद्धन्तथा सुरथराजसमाधिवैश्ययोः सुमेधामुनिसमीपगमनादिकं वर्णितं वर्तते । एतेषु वर्णनेषु द्वात्रिंशत्तमाध्यायस्य सुमेधामुन्याश्रमङ्गतस्य सुरथराजस्य वर्णने शान्तरसस्थितिर्यथा दृश्यते–

शृणु राजन् प्रवक्ष्यामि कारणं बन्धमोक्षयोः ॥
ज्ञानिनामपि चेतांसि मोहयत्यनिशं हि सा ।
ब्रह्मेशवासुदेवाद्या ज्ञाने सत्यपि शेषतः ॥
तेऽपि रागवशाल्लोके भ्रमन्ति परिमोहिताः ।
पुरा सत्ययुगे राजन् विष्णुर्नारायणः स्वयम् ॥ (५।३३।९,१४,१५)

अत्र हि आत्मज्ञानरतः शान्तः सुमेधामुनिः विषयालम्बनं तपोवनं गतो नृपः सुरथराज आश्रयालम्बनं हो मधूमसुगन्धवेदध्वन्यादिकमुद्दीपनं मुनिचरणनिपतनादिकमनुभावः निर्वेदस्मृतिमत्यादयो व्यभिचारिणः सन्ति । तैरभिव्यक्तः शमः शान्तरसत्वं प्राप्नोति ।

एवञ्च त्रयस्त्रिंशत्तमेऽध्याये पञ्चत्रिंशत्तमेऽध्याये च सुरथराजसमाधिवैश्यचरित्रवर्णनप्रसङ्गे शान्तरसस्थितिः स्पष्टतया दृश्यते ।

**षष्ठस्कन्धगतशान्तरसानुशीलनम्**

अस्मिन् षष्ठस्कन्धे त्रिशिरसस्तपोभङ्गादारभ्य वृत्रोत्पत्तिः, नहुषचरितचित्रणन्तथा हरिश्चन्द्रहैहयैक-वीरैकावलीनारददमयन्त्यादीनां चित्रणञ्च प्राप्यते । एषु चित्रणेषु मध्ये मायाबलं विलोक्य विस्मयापन्नस्य नारदस्य प्रश्नानुसारं ब्रह्मकृतमायावर्णनसन्दर्भे शान्तरसस्थितिर्यथा दृश्यते—

दुर्जयैषा सुरैः सर्वैर्मुनिभिश्च महात्मभिः ।
तापसैर्ज्ञानयुक्तैश्च योगिभिः पवनाशनैः ॥
नाहं तां सर्वथा ज्ञातुं शक्तो मायां महाबलाम् ।
विष्णुर्ज्ञातुं न शक्तश्च तथा शम्भुरुमापतिः ॥
दुर्ज्ञेया सा महामाया सृष्टिस्थित्यन्तकारिणी ।
कालकर्मस्वभावाद्यैर्निमित्तकारणैर्वृता ॥

शोकं मा कुरु मेधाविंस्तत्र मायामहाबले ।
न चैवं विस्मयः कार्यो वयं सर्वे विमोहिताः ॥ (६।३१।१९–२२)

अत्र हि अजितात्मभिर्दुर्ज्ञेया योगमाया विषयालम्बनं ब्रह्मा आश्रयालम्बनं मायया वञ्चितस्य नारदस्य तथाविधकथनमुद्दीपनं नारदं प्रति मायावर्णनमनुभावो निर्वेदहर्षस्मृत्यादयश्च व्यभिचारिण एतैरभिव्यक्तः शमः शान्तरसरूपेण परिणमते ।

**सप्तमस्कन्धगतशान्तरसानुशीलनम्**

अस्मिन् स्कन्धे सोमसूर्यवंशवर्णनसन्दर्भे दक्षप्रजापतेराख्यानादारभ्य च्यवनसुकन्याश्विनी–कुमारशर्यातिरेवतमान्धातृसत्यव्रतत्रिशङ्कुविश्वामित्रहरिश्चन्द्रशताक्षीहिमालयादीनां वर्णनं प्राप्यते । अतोऽस्मिन् स्कन्धे स्थले स्थले शान्तरसपरिपाकः स्पष्टतयानुभूयते । तत्रापि द्वितीयाध्याये भार्गवस्य च्यवनस्य वर्णनसन्दर्भे शान्तरसस्थितिः यथा प्राप्यते—

बभूव कोकिलारावः केकास्वनविराजितम् ।
तत्समीपे शुभे देशे पादपानां गणावृते ॥
भार्गवश्च्यवनः शान्तस्तापसः संस्थितो मुनिः ।
ज्ञात्वासौ विजनं स्थानं तपस्तेपे समाहितः ॥ (७।२।४०,४१)

अत्र हि विजनं तपोवनं विषयालम्बनं कोकिलारावादिकमुद्दीपनं तपश्चर्यानुभावो निर्वेदस्मृतिमत्यादयः सञ्चारिणः सन्ति । यतोऽभिव्यक्तः शमो शान्तरसरूपेण प्रकाशते ।

**अष्टमस्कन्धगतशान्तरसानुशीलनम्**

अस्मिन् अष्टमस्कन्धे भुवनकोशवर्णनप्रसङ्गे देव्या मनवे वरदानादारभ्य धरण्युद्धारभुवनकोश–विस्तारगङ्गावतरणेलावृतभारतादिवर्षवर्णनप्लक्षादिद्वीपवर्णनसूर्यादिगतिवर्णनम्, अतलादिलोकवर्णनन्तथान्ते नरकवर्णनं देवीपूजनविधिश्च वर्णितो वर्तते । एतेषु शान्तरसस्थितिः स्वल्पतया समुपलभ्यते ।

एकादशाध्याये भारतवर्षस्य वर्णनसन्दर्भे नारदकृतनारायणस्तवने आदौ नारायणभक्तिः प्रतीतिपथङ्गच्छति पश्चात्तु सा शान्तरसरूपताङ्गच्छति । तत्तु यथा वर्तते—

यथैहिकामुष्मिककामलम्पटः
सुतेषु दारेषु धनेषु चिन्तयन् ।
शङ्केत विद्वान् कुकलेवरात्यया–
द्यस्तस्य यत्नः श्रम एव केवलम् ॥
तन्नः प्रभो त्वं कुकलेवरार्पितां
त्वं माययाहं ममतामधोक्षज ।
भिन्द्याम येनाशु वयं सुदुर्भिदां
विधेहि योगं त्वयि नः स्वभावजम् ॥ (८।११।४,५)

अत्रहिनरनारायणोविषयालम्बनंनारदआश्रयालम्बनंपुण्यंभारतवर्षमुद्दीपनंनारदकृततथाविधस्तवनमनुभावो निर्वेदस्मृतिमत्यादयो व्यभिचारिभावाः शममभिव्यञ्जयन्तः शान्तरसं सम्पादयन्ति ।

**नवमस्कन्धगतशान्तरसानुशीलनम्**

अस्मिन् नवमस्कन्धे प्रकृतितत्त्वनिरूपणादारभ्य सरस्वतीस्तोत्रवर्णनम्, लक्ष्मीगङ्गासरस्वतीतुलसी-शङ्खचूडानां वर्णनम्, यमसावित्रीसंवादः, स्वाहास्वधोपाख्यानमिति विषया वर्णिताः सन्ति।

अत्र शान्तरसस्य स्थितिः सप्तमाध्यायस्य तुलसीतपश्चर्यावर्णनसन्दर्भे यथा प्राप्यते—

तेन नाम्ना च तुलसीं तां वदन्ति मनीषिणः।
सा च भूमिष्ठमात्रेण योग्या स्त्री प्रकृतिर्यथा॥
सर्वैर्निषिद्धा तपसे जगाम बदरीवनम्।
तत्र देवाब्दलक्षं च चकार परमं तपः॥ (९।७।१३,१४)

अत्र हि नारायण एव सर्वस्वमित्याकलनं विषयालम्बनं बदरीवनन्तत्रत्या ऋषयश्चोद्दीपनानि तपश्चर्यादिकमनुभावो निर्वेदहर्षमत्यादयो व्यभिचारिणो यतोऽभिव्यक्तः शमः शान्तरसरूपतां प्रतिपद्यते।

एवञ्च सप्तविंशतितमाध्यायादारभ्य अष्टत्रिंशत्तमाध्यायं यावत् सम्भूते यमसावित्रीसंवादेऽपि स्थले स्थले शान्तरसस्थितिर्दृश्यते। तथा च पञ्चाशत्तमाध्यायस्य नारदनारयणसंवादप्रसङ्गेऽपि शान्तरसः प्रतीतिपथङ्गच्छति।

**दशमस्कन्धगतशान्तरसानुशीलनम्**

अस्मिन् स्कन्धे स्वायम्भुवमनुकृतदेवीस्तुतितो विन्ध्योपाख्यानम्, रुद्रप्रार्थना, अगस्त्याश्वासनम्, स्वरोचिषादि-मनूनामुत्पत्तिस्तथा सुरथराजसावर्णिमनुदक्षसावर्ण्यादिमनुवर्णनम्, भ्रामरीचरितम् इति विषया वर्णिताः सन्ति।

तेषु विषयेषु प्रथमाध्यायस्य आदावेव नारदकृतनारायणप्रार्थनाप्रसङ्गे शान्तरसस्थितिर्यथा दृश्यते—

नारायण धराधार सर्वपालनकारण।
भवतोदीरितं देवीचरितं पापनाशनम्॥
मन्वन्तरेषु सर्वेषु सा देवी यत्स्वरूपिणी।
यदाकारेण कुरुते प्रादुर्भावं महेश्वरी॥
तान्नः सर्वान्समाख्याहि देवीमाहात्म्यमिश्रितान्।
यथा च येन येनेह पूजिता संस्तुतापि हि॥
मनोरथान् पूरयति भक्तानां भक्तवत्सला।
तन्नः शुश्रूषमाणानां देवीचरितमुत्तमम्॥
वर्णयस्व कृपासिन्धो येनाप्नोति सुखं महत्। (१०।१।१–५)

अत्र हि देवी एव सर्वस्वमित्याकलनं विषयालम्बनं देवीभक्तो नारद आश्रयालम्बनं नाराणसङ्गतिस्तपोवनादिकमुद्दीपनं देवीगुणकीर्तने तथाविधप्रार्थनमनुभावो हर्षस्मृत्यादयः सञ्चारिण एतैरभिव्यक्तः शमः शान्तरसरूपतां प्राप्नोति।

एवञ्चैकादशाध्यायस्य सुरथराजसमाधिवैश्ययोः संवादप्रङ्गेऽपि शान्तरसस्थितिः स्पष्टतया दृश्यते।

**एकादशस्कन्धगतशान्तरसानुशीलनम्**

अस्मिन् स्कन्धे सदाचारनिरूपणादारभ्य शौचविधिवर्णनम्, रुद्राक्षमाहात्म्यम्, भस्ममाहात्म्यम्,

सन्ध्योपासनविधिः, बृहद्रथकथानकम्, गायत्रीपुरश्चरणम् इत्यादिविषया वर्णिताः सन्ति।

तत्रापि अष्टादशादारभ्य बृहद्रथनृपमुनिसंवादप्रसङ्गे शान्तरसस्थितिर्यथा दृश्यते—

न शिवोपासना नित्या न विष्णूपासना तथा।
नित्योपास्तिः परा देव्या नित्या श्रुत्यैव चोदिता॥
किं मया बहु वक्तव्यं स्थाने संशयवर्जिते।
सेवनीयं पदम्भोजं भगवत्या निरन्तरम्॥
नातः परतरं किञ्चिदधिकं जगतीतले।
सेवनीया सदा देवी निर्गुणा सगुणाथवा॥ (११।१८।६६–६८)

अत्र हि भगवत्या पदाम्भोजं विषयालम्बनं राजा बृहद्रथ आश्रयालम्बनं मुनिसङ्गतिरुद्दीपनं रोमाञ्चाश्रुपातादयो व्यभिचारिणो यतोऽभिव्यक्तः स्थायी भावः शमः शान्तरसरूपेण हृदयं विनोदयति।

**द्वादशस्कन्धगतशान्तरसानुशीलनम्**

अस्मिन् स्कन्धे गायत्र्या वर्णदेवतादीनां निरूपणपूर्वकं गायत्र्या वर्णकवचहृदयस्तोत्रसहस्रनामकीर्तनन्तथा मन्त्रदीक्षाविधिः, पराशक्तेः प्रादुर्भावो गौतमोपाख्यानम्, मणिद्वीपवर्णनम्, पुराणमाहात्म्यम्, पुराणश्रवणफलकथनम् इति विषया वर्णिता सन्ति। एतेषु विषयेषु शान्तरसस्थितिः स्वल्पतयैवोपलभ्यते।

नवमाध्यायस्य अनावृष्टिपीडितानां ब्रह्मणानां गौतमर्षिकृतसत्कारवर्णनसन्दर्भे तु शान्तरसप्रवाहो यथा लभ्यते—

धन्योऽहमस्मिन् समये यूयं सर्वे तपोधनाः।
येषां दर्शनमात्रेण दुष्कृतं सुकृतायते॥
ते सर्वे पादरजसा पावयन्ति गृहं मम।
को मदन्यो भवेद् धन्यो भवतां समनुग्रहात्॥
स्थेयं सर्वैः सुखेनैव सन्ध्याजपपरायणैः। (१२।९।१३–१५)

अत्र हि भगवत्या गायत्र्याः पावनसान्निध्यं विषयालम्बनं गौतमो मुनिराश्रयालम्बनं तपोधनानां ब्रह्मणानां सङ्गतयश्चोद्दपिनानि ब्राह्मणप्रशंनादयोऽनुभावा हर्षस्मृतिमत्यादयः सञ्चारिणः शमस्थायिकं शान्तरसं प्रदीपयन्ति।

इत्थं श्रीमद्देवीभागवते शान्तरसस्थितिः विशेषेणोपलभ्यते।

## निष्कर्षः

व्यासविरचितदेवीभागवतस्य साहित्यिकक्षेत्रेऽपि विशिष्टस्थानमस्ति। रसानुशीलनसन्दर्भे शान्तरसस्य बहुषु स्थलेषूपस्थितिर्दृश्यते। देवीभागवतमिदं देव्या दानवानाञ्च युद्धवर्णनेन वीररसमयमिवालोक्यते परन्तु प्रथमस्कन्धादारभ्य द्वादशस्कन्धं यावच्छान्तरसस्यैव समानयोपस्थित्या शान्तरस एवाङ्गित्वेन राजत इति वक्तुं शक्यते। अत्र वर्णितानां सूतशौनकव्यासनारदजनमेजयसुरथराजसमाधिवैश्यादिपात्राणां देवीविषयिणी रतिः शान्तरसं प्रति गच्छन्ती दृश्यते। न केवलमत्राङ्गित्वेन विराजमानस्य शान्तरसस्यैवान्येषां रसानामपि यथोचितविन्यासो विहितोऽस्ति। अनेन लघ्वनुसन्धानेन देवीभागवतमिदं रसक्षेत्रेऽप्यौचित्यपूर्णमस्ति, पाठकजनमानसानि रञ्जयितुञ्च सर्वतोभावेन सफलं दृश्यते।

**कृतज्ञताज्ञापनम्**

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्यः सर्वेभ्यो विशेषज्ञगुरुभ्यः, अन्येभ्यः सहयोगिभ्यश्च हार्दं कातज्ञ्यं व्यनज्मि।

**सन्दर्भग्रन्थसूची–**

अमरसिंहः (सन्१९७०). अमरकोषः, वाराणसी : चौखम्बा सीरिज आफीस।

आनन्दवर्धनः (सन्१९९१). ध्वन्यालोकः (व्या. लोकमणिदाहालः), वाराणसी : भारतीय विद्या प्रकाशन।

जगन्नाथः (सन्२००३). रसगंगाधरः(प्र.आ.),द्वि.सं., वाराणसी : चौखम्बा विद्याभवन।

धनञ्जयः (सन्२००४). दशरूपकम् (द्वि.सं.), वाराणसी : मोतीलाल वनारसीदास।

पाणिनिः (सन्१९५०). अष्टाध्यायी, वाराणसी : चौखम्बा संस्कृत सीरीज आफीस।

मम्मटः (सन्२००४). काव्यप्रकाशः, वाराणसी : ज्ञानमण्डललिमिटेड।

मेदिनीकारः (सन्१९६८). मेदिनीकोषः, वाराणसी : चौखम्बा संस्कृत सीरीज आफीस।

विश्वनाथः (सन्२००२). साहित्यदर्पणः, दिल्ली : मोतीलाल वनारसीदास।

व्यासः (वि.सं.२०६९). श्रीमद्देवीभागवतमहापुराणम् , गोरखपुर : गीताप्रेस।

शारदातनयः (सन् १९८३). भावप्रकाशनम् (द्वि.सं.), वाराणसी : चौखम्बा सुरभारती प्रकाशन।

शुक्लः,बाबुलालः (सं.), (वि.सं.२०५७). नाट्यशास्त्रम् प्र.भा.(तृ.सं.), वाराणसी : चौखम्बा संस्कृत संस्थान।